ते वन्य कहीए। वन्यः वनमां उत्पन्न थयेलो एवो द्विप जे हाथी ते वन्याद्विप कहीए। वन्यद्विपेन = आरण्यगजेन वनना हाथी जे तेणे अस्य = देवदारोः आ देव-दारु वृक्ष जे तेनी। त्वक् = वल्कलं (त्वचा) छाल जेते। उन्मथिता = उत्पाटिता उखाडी नांखी। अथ = अनन्तरं ते पछी। अद्रेः = हिमाचलस्य हिमाचल जे तेनी। तनया=पुत्री पार्वती जेते असुरास्त्रैः अस्यन्ते एभिः इति अस्त्राणि (कृ० व्यु०) असुराणां अस्त्राणि असु-रास्त्राणि (ष० त०) तैः असुरास्त्रैः। अस्यन्ते=क्षिप्य-न्ते फेंकाय एभिः आ वडे करीने ते अस्त्र कहीए। असुराणां दैत्यानां दैत्यो जे तेमनां अस्त्र जे आयुध ते असुरास्त्र कहीए असुरास्त्रै =दैत्यप्रहरणैः दैत्योनां आयुधो जे तेमणे करीने। आलीढं अ समन्तात् लीढः आलीढः। तं आलीढं। आसमन्तात् चारे तरफथी लीढ जे क्षत ते आलीढ कहीए। आलीढम्= क्षतं घायल थयेलो एवो। सेनान्यं सेनां नयतीति सेनानीः (कृ० व्यु० ष० त०) तं सेनान्यं। सेनां=चमूम् सेना जे तेने नयति लइ जाय जे ते सेनानी कहीए। सेनान्यं इव=स्कन्दं इव कार्तिकेय स्वामी जे तेने ज जेम एम। एनं=देवदारुं ए देव-दारु वृक्ष जे तेने शुशोच=शोचितवती शोक करती हवी ३७

तनया एनं शुशोच स०क०प्र०	कण्डूयमानेन	वन्यद्विपेन
तनया सेनान्यं शुशोच स०	उन्मथिता	त्वक्
वन्यद्विपेन त्वक् उन्मथि०क०	आलीढम्	सेनान्यम्

(ગુ० ભા०) કોઈ વખતે ગણ્ડસ્થલ=લમણાને ખણતા વનના હાથીએ આ દેવદારૂ વૃક્ષની છાલ ઉખાડી નાંખી. આથી પાર્વતીજી દૈત્યોના શસ્ત્રોથી ઘવાયેલા કાર્તિક સ્વામીનો જેવો શોક કરે તેવો આ દેવદારૂ વૃક્ષનો શોક કરતાં હતાં ॥ ૩૭ ॥

तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ ।
व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतसत्त्ववृत्ति ॥३८॥

(अन्वयः) तदाप्रभृति एव वनद्विपानां त्रासार्थं शूलभृता अङ्कागतसत्त्ववृत्ति सिंहत्वं विधाय अस्मिन् अद्रिकुक्षौ अहं व्यापारितः (अस्मि) ॥३८॥

(टीका) तदाप्रभृति तदा प्रभृतिर्यस्मिन्कर्मणि यथा स्यात्तथा इति तदाप्रभृति (स० ब०) तदा=तत्कालः ते काल छे प्रभृति आदि जे कर्मने विषे जेम होय तेम ते तदाप्रभृति कहीए । तदाप्रभृति एव=तत्कालादारभ्य एव ते कालथी आरंभीनेज । वनद्विपानां । द्वाभ्यां पिबन्तीति द्विपाः (कृ०व्यु० तृ० त०) वनस्य द्विपाः वनद्विपाः । तेषां वनद्विपानाम् । द्वाभ्यां=मुखशुण्डाभ्यां मुख अने शुण्ढ वडे करीने पिबन्ति पान करे जे ते द्विप कहीए । वनस्य वन जे तेना द्विप जे हाथीओ ते वनद्विप कहीए । वनद्विपानां=वनवासिगजानां वनमां रहेनारा हाथीओ जे तेमना । त्रासार्थं त्रासाय इति त्रासार्थम् (च० त०) त्रासाय त्रासने माटे ते त्रासार्थ कहीए । त्रासार्थं=भयार्थं त्रासने माटे । शूलभृता शूलं बिभर्तीति शूलभृत् (कृ० व्यु० ष० त०) तेन शूलभृता । शूलं त्रिशूलं त्रिशूळ जे तेने बिभर्ति धारण करे जे ते शूलभृत् कहीए । शूलभृता=शिवेन शिव जे तेणे । अङ्कागतसत्त्ववृत्ति अङ्कं आगताः अङ्कागताः (द्वि० त०) अंकागताश्च ते सत्त्वाश्च अङ्कागतसत्त्वाः (त्रि० पू० क०) अंकागतसत्त्वाः वृत्तिर्यस्मिंस्तत् अंकागतसत्त्ववृत्ति (स० ब०) तत् अंकागतसत्त्ववृत्ति । अङ्कम्=समीपं समीप जे तेने आगताः जे प्राप्त थयेला ते अङ्कागत कहीए । अंकागताः अंकागत एवा सत्त्व जे प्राणीओ ते अंकागतसत्त्व कहीए । अंकागतसत्त्वाः=समीपमां आवेला प्राणीओ एज छे वृत्ति जीवन ते जेमां ते अंकागतसत्त्ववृत्ति कहीए

अंकागतसत्त्वजीवितं=समीपागतप्राणिजीविकं समीपमां आवेला प्राणीओ एज छे जीवन जेमां एवुं । सिंहत्वं सिंहस्य भावः सिंहत्वं (त० व्यु०) तत् सिंहत्वं । सिंहस्य सिंह जे तेनो भाव जे धर्म ते सिंहत्व कहीए । सिंहत्वं=केसरित्वं ।सिंहपणुं जे तेने । विधाय=कृत्वा करीने । अस्मिन्=एतास्मिन् आ । अद्रिकुक्षौ अद्रेः कुक्षिः अद्रिकुक्षिः (ष० त०) तस्मिन् अद्रि-कुक्षौ । अद्रेः=हिमालयस्य हिमालय जे तेनी कुक्षि जे गुहा ते अद्रिकुक्षि कहीए । अद्रिकुक्षौ=गिरिगुहायां पर्वतना । गुहाने विषे । अहं हुं जेते । व्यापारितः=नियुक्तः गोठवारेला । (अस्मि=छुं) ॥ ३८ ॥

अहं	अस्मि अ०	अंकागतसत्त्व०	सिंहत्वं
शूलभृता अहं व्यापा० क०		व्यापारितः	अहम्
शूलभृता सिंहत्वं विधाय (कृ० भा० प्र०)		अस्मिन्	अद्रिकुक्षौ

(गु० भा०) त्यारथीज आरंभीने महादेवे वनना हाथीओने त्रास आपवा (नसाडी मूकवा) समीपमां आवेला प्राणीओ उपरज जीवन रही शके एवो सिंह मने बनावीने आ पर्वतनी गुफामां बेसाड्यो छे ॥ ३८ ॥

तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण ।
उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ॥३९॥

(अन्वयः) परमेश्वरेण प्रदिष्टकाला उपस्थिता एषा शोणितपारणा सुरद्विषः चान्द्रमसी सुधा इव क्षुधितस्य त स्यमे तृप्त्यै अलं (अस्ति) ॥ ३९ ॥

(टीका) परमेश्वरेण ईष्टेऽसौ ईश्वरः (कृ० व्यु०) परमश्चासौ ईश्वरश्च परमेश्वरः (वि० पू० क०) तेन परमे-श्वरेण । ईष्टे समर्थ थाय जे ते ईश्वर कहीए । परमः उत्कृष्ट एवा ईश्वर जे महादेव ते परमेश्वर कहीए । परमेश्वरेण=

भगवता महादेवेन महादेव जे तेणे । प्रदिष्टकाला प्रदिष्टः कालो यस्याः सा प्रादेष्टकाला (ष० ब०) प्रदिष्टः=निर्दिष्टः देखाड्यो छे काल भोजनकाल ते जेनो ते प्रादेष्टकाला कहीए । प्रदिष्टकाला=निर्दिष्टसमया बताव्यो छे भोजनकाल जेनो एवी । उपस्थिता=प्राप्ता प्राप्त थयेली एवी । एषा=इयं गोरूपा आ गोरूप एवी । शोणितपारणा शोणितस्य पारणा शोणितपारणा (ष० त०) शोणितस्य रुधिरस्य रुधिर जे तेनी पारणा जे व्रतान्तभोजन ते शोणितपारणा कहीए । शोणितपारणा=रुधिरव्रतान्तभोजनं शोणितपारण जेते । सुरद्विषः सुरान् द्वेष्टीति सुरद्विट् (कृ० व्यु० ष० त०) तस्य सुरद्विषः । सुरान्=देवान् देवो जे तेमने द्वेष्टि द्वेष करे जे ते सुरद्विष् कहीए । सुरद्विषः=राहोः राहु जे तेने चान्द्रमसी चन्द्रमसः इयं चान्द्रमसी (त० व्यु०) चन्द्रमसः=चन्द्रस्य चन्द्र सम्बन्धी इयं जे आ ते चान्द्रमसी कहीए। चान्द्रमसी =चन्द्रसंबन्धिनी चन्द्रमा सम्बन्धी एवी । सुधा इव=पीयूषं इव अमृत जेतेज जेम एम । क्षुधितस्य क्षुधा संजाता अस्य इति क्षुधितः (त० व्यु) तस्य क्षुधितस्य । क्षुधा=भूख जेते संजाता उत्पन्न थई छे अस्य आने ते क्षुधित कहीए । क्षुधितस्य=बुभुक्षितस्य भूख्यो एवो । तस्य=पूर्वोक्तस्य अंकागतसत्ववृत्तेः अंकागतसत्ववृत्तिवाळो एवो । मे=मम मारी तृप्त्यै=सन्तोषाय सन्तोषने माटे । अलं=पर्याप्तं बस (अस्ति= छे) ॥ ३९ ॥

शोणितपारणा	अस्ति	प्रदिष्टकाला	}	शोणितपारणा
सुधा	अस्ति	उपस्थिता	}	
(बन्ने अ० क० प्र०)		एषा	}	
परमेश्व० कालः प्रदिष्टः		चान्द्रमसी		सुधा
(क० प्र०)		क्षुधितस्य	}	मे
		तस्य	}	

(ગુ૦ ભા૦) રાહુની તૃપ્તિને માટે ચન્દ્રમા સંબંધી અમૃત જેમ પર્યાપ્ત છે તેમ, પોતાની પાસે આવેલા પ્રાણીઓ ઉપર જ જીવન ચલાવનાર ભૂખ્યા એવા મારી તૃપ્તિને માટે કાળથી પ્રેરાયેલી પરમેશ્વરે મોકલેલી આ ગાયરૂપ લોહીની પારણા બસ છે ॥ ૩૯ ॥

स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः ।
शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ॥४०॥

(अन्वयः) सः त्वं लज्जां विहाय निवर्तस्व । भवान् गुरोः दर्शितशिष्यभक्तिः (अस्ति) यद् रक्ष्यं शस्त्रेण अशक्यरक्षं तत् शस्त्रभृतां यशः न क्षिणोति ॥ ४० ॥

(टीका) सः=एवं उपायशून्यः एप्रमाणे उपाय वगरनो एवो । त्वं=तुं जेते । लज्जां=त्रपां लाज जेतेने । विहाय त्यक्त्वा=तजी दईने । निवर्तस्व=परावृत्तो भव पाछो जा । भवान=त्वं तुं जेते । गुरोः । गृणातीति गुरुः (कृ० व्यु०) तस्य गुरोः गृणाति उपदिशति उपदेश करे जे ते गुरु कहीए । गुरोः=वसिष्ठस्य वसिष्ठमुनि जे तेमने । दर्शितशिष्यभक्तिः शिष्यस्य भक्तिः शिष्यभक्तिः (ष० त०) दर्शिता शिष्यभक्तिर्येन सः दर्शितशिष्यभक्तिः (तृ० ब०) शिष्यस्य शिष्य जे तेनी भक्ति जे सेवा ते शिष्यभक्ति कहीए । दर्शिता=बतावी छे शिष्यभक्ति ते जेणे ते दर्शितशिष्यभक्ति कहीए । दर्शितशिष्यभक्तिः=प्रकटितच्छात्रसेवः शिष्यनी कर्तव्यता जेणे बतावी छे एवो । (अस्ति=विद्यते छे) यद्=जे । रक्ष्यं रक्षितुं योग्यं रक्ष्यम् (कृ० व्यु०) रक्षितुं रक्षण करवाने जे योग्य ते रक्ष्य कहीए । रक्ष्यं=रक्षणीयं वस्तु रक्षण करवा लायक वस्तु जेते । शस्त्रेण । शस्यते अनेनेति शस्त्रम् (कृ० व्यु०) तेन शस्त्रेण । शस्यते हिंस्यते हिंसा कराय अनेन आ वडे करीने ते शस्त्र कहीए । शस्त्रेण=आयुधेन=आयुध जे तेणे करीने । अशक्यरक्षं शक्तुं योग्या शक्या (कृ० व्यु०) न

शक्या अशक्या (न० त०) अशक्या रक्षा यस्य तत् अशक्यरक्षम् (ष० ब०) शक्तुं समर्थ थवाने जे योग्य ते शक्या कहीए । न नहि जे शक्या ते अशक्या कहीए । अशक्या अशक्य छे रक्षा=रक्षा ते जेनी ते अशक्यरक्ष कहीए । अशक्यरक्षं=रक्षितुमशक्यं जेनी रक्षा अशक्य छे एवुं । तत्=रक्ष्यं वस्तु रक्षण करवा लायक वस्तु जेते । शस्त्रभृतां शस्त्राणि बिभ्रतीति शस्त्रभृतः (कृ० व्यु० ष० त०) तेषां शस्त्रभृतां । शस्त्राणि शस्त्रो जे तेमने बिभ्रति धारण करे जे ते शस्त्रभृत् कहीए । शस्त्रभृतां=आयुधधारिणां शस्त्रने धारण करनार जे तेमनुं । यशः=कीर्ति यश जे तेने । न क्षिणोति=न हिनस्ति नष्ट करतुं नथी ॥४०॥

भवान् अस्ति. (अ०क० प्र०)	दर्शित [illegible] व्य० (विधेय) भवान्
तत् यशः न क्षिणोति स०	रक्ष्यं } यत्
त्वं निवर्तस्व० अ०	अशक्यरक्षं }
त्वया लज्जां विहाय भा०	

(गु० भा०) उपाय वगरनो तुं लज्जा छोडी पाछो जा तुं गुरुनो साचो भक्त छे. हथीआरथी रक्षण करवा योग्य वस्तुनुं हथीआरथी यदि रक्षण न करी शकाय तो ते वस्तु शस्त्रधारी पुरुषोना यशने कलुषित करतुं नथी ॥.४० ॥

इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य ।
प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ॥४१॥

(अन्वयः) पुरुषाधिराजः इति प्रगल्भं मृगाधिराजस्य वचः निशम्य (अहं) गिरिशप्रभावात् प्रत्याहतास्त्रः (अस्मि इति) आत्मनि अवज्ञां शिथिलीचकार ॥ ४१ ॥

(टीका) पुरुषाधिराजः राजते असौ राजा (कृ० व्यु०) अधि चासौ राजा च अधिराजः (वि० पू० क०) पुरुषाणां अधिराजः पुरुषाधिराजः (ष० त०) राजते शोभते शोभे जे

ते राजन् कहीए । अधि चासौ अधिक एवो जे राजा तें अधिराज कहीए । पुरुषाणां=मनुष्याणां मनुष्यो जे तेमनो अधिराज जे स्वामी ते पुरुषाधिराज कहीए । पुरुषाधिराजः= नराधिपः दिलीप राजा जेते । इति=इत्थं ए प्रकारे । प्रग- ल्भं=धृष्टं बडाई वाळुं (उदारम् उदार एवुं) मृगाधिराजस्य (अधिराज शब्दनो समास उपरनी माफक) मृगाणां अधि· राजः मृगाधिराजः (ष० त०) तस्य मृगाधिराजस्य । मृगाणां हरिणानां हरिणो जे तेमनो अधिराज जे स्वामी ते मृगाधि- राज कहीए । मृगाधिराजस्य=सिंहस्य सिंह जे तेनुं वचः= वचनं वाक्य जे तेने । निशम्य=श्रुत्वा सांभळीने । अहं=हुं जेते) गिरिशप्रभावात् गिरिरस्यास्तीति गिरिशः (त० व्यु०) गिरिशस्य प्रभावः गिरिशप्रभावः (ष० त०) तस्मात् गिरि- शप्रभावात् गिरिः पर्वतः हिमालय जेते अस्ति छे अस्य आने ते गिरिश कहीए । गिरिशस्य=शंकरस्य शंकर जे तेनो प्रभाव जे प्रताप ते गिरिशप्रभाव कहीए । गिरिशप्रभावात्= शिवसामर्थ्यात् महादेवना सामर्थ्यथकी। प्रत्याहतास्त्रः प्रत्या- हतं अस्त्रं यस्य सः प्रत्याहतास्त्रः (ष० ब०) प्रत्याहतं=कु- ण्ठितं कुण्ठित थयुं छे अस्त्र आयुध ते जेनुं ते प्रत्याहतास्त्र कहीए । प्रत्याहतास्त्रः=प्रतिरुद्धायुधः रोकाई गयुं छे अस्त्र ते जेनुं एवो (अस्मि छुं इति ए प्रकारे मत्वा मानीने) आत्मनि= चित्त पोताने विषे । अवज्ञां=अपमानं अपमान जे तेने । शिथिलीचकार । न शिथिला अशिथिला । अशिथिला शिथि- ला । यथा संपद्यमानां चकार इति शिथिलीचकार (त० व्यु० त० स०) न नहि जे शिथिल ते अशिथिला कहीए । अशि- थिल जे शिथिल । यथा संपद्यमानां जेम होय तेम चकार करतो हवो ते शिथिलीचकार कहीए । शिथिलीचकार= तत्याज शिथिल करतो हवो अर्थात् त्याग करतो हवो ॥ ४१ ॥

पुरुषा० अवज्ञां शिथिली० स०	प्रगल्भं वचः
अहं अस्मि अ०	प्रत्याहृतास्त्रः (वि०) पुरु-
पुरुषाधिराजेन वचः निशम्य. भा०	षाधिराजः

(ગુ० ભા०) દિલીપ રાજા આ પ્રમાણે બડાઈવાળું સિંહનું સર્વ વૃત્તાન્ત સાંભળી પોતાના અસ્ત્રની ગતિ મહાદેવજીના પ્રભાવથી જ રોકાયેલી સમજીને પોતાને થયેલ અપમાન વિશેષ ન સમજ્યો. (કારણ કે ક્ષત્રિયોનો અભિમાન સમાનમાં જ હોય છે. પરમેશ્વર પ્રત્યે હોતો નથી.) ॥ ४१ ॥

प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वभङ्गे वितथप्रयत्नः ।
जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः ॥४२॥

(अन्वयः) तत्पूर्वभङ्गे इषुप्रयोगे वितथप्रयत्नः (अत एव) वज्रं मुमुक्षन् त्र्यम्बकवीक्षणेन जडीकृतः वज्रपाणिः इव (स्थितः दिलीपः) एनं प्रत्यब्रवीत् ॥ ४२ ॥

(टीका) तत्पूर्वभङ्गे स एव पूर्वः तत्पूर्वः (अ० क० स०) तत्पूर्वः भङ्गो यस्य सः तत्पूर्वभङ्गः (ष० ब०) तस्मिन् तत्पूर्वभङ्गे । स एव तेज पूर्व जे प्रथम ते तत्पूर्व कहीए । तत्पूर्वः तेज प्रथम छे भङ्ग प्रतिबन्ध ते जेनो ते तत्पूर्वभङ्ग कहीए तत्पूर्वभङ्गे=अभूतपूर्वव्याघाते तेज प्रथम छे प्रतिबन्ध जेनो एवो । इषुप्रयोगे इषोः प्रयोगः इषुप्रयोगः (ष० त०) तस्मिन् इषुप्रयोगे । इषोः=बाणस्य बाण जे तेनो जे प्रयोग ते इषुप्रयोग कहीए । इषुप्रयोगे=बाणप्रयोगे बाणना प्रयोगने विषे । वितथप्रयत्नः वितथः प्रयत्नो यस्य सः वितथप्रयत्नः (ष० ब०) वितथः=विफलः विफल छे प्रयत्न प्रयास ते जेनो ते वितथप्रयत्न कहीए । वितथप्रयत्नः=विफलायासः विफलप्रयत्नवालो एवो । (अत एव=एटलाज कारणथी)

वज्रं=कुलिशं वज्र जे तेने। मुमुक्षन् मोक्तुं इच्छतीति मुमुक्षति (स० व्यु०) मुमुक्षतीति मुमुक्षन् (कृ० व्यु०) मोक्तुं =मुकवाने इच्छति इच्छा करे जे ते मुमुक्षति कहीए। मुमुक्षति मुकवानी इच्छा करे जे ते मुमुक्षत् कहीए। मुमुक्षन्= मोक्तुमिच्छन् मुकवानो इच्छा करतो एवो। त्र्यम्बकवीक्षणेन विशेषेण ईक्षणं वीक्षणं, त्रीणि अम्बकानि यस्य सः त्र्यम्बकः (ष० ब०) त्र्यम्बकस्य वीक्षणं त्र्यम्बकवीक्षणं (ष० त०) तेन त्र्यम्बकवीक्षणेन। विशेषेण वधारे ईक्षण जे जोवुं ते वीक्षण कहीए। त्रीणि त्रण छे अम्बक=नेत्र ते जेनां ते त्र्यम्बक कहीए। त्र्यम्बकस्य=शिवस्य शिव जे तेनुं वीक्षण जे विलोकन ते त्र्यम्बकवीक्षण कहीए। त्र्यम्बकवीक्षणेन=शिवदृष्टिपातेन शंकरना जोवा वडे करीने। जडीकृतः। न जडः अजडः। अजडः जडः। यथा संपद्यमानः कृतः इति जडीकृतः (त० व्यु० त० स०) नहि जे जड ते अजड कहीए। अजड जे जड। यथा संपद्यमानः जेम होय तेम कृतः कर्यो ते जडीकृत कहीए। जडीकृतः=स्तब्धीकृतः निश्चेष्ट करेलो एवो। वज्रपाणिः वज्रं पाणौ यस्य सः वज्रपाणिः (ष० ब०) वज्रं=भिदुरं वज्र छे पाणौ हस्ते हाथने विषे ते जेना ते वज्रपाणि कहीए। वज्रपाणिः इव वज्रहस्तः इन्द्रः इव इन्द्र जे तेज जेम एम (स्थितः रहेलो एवो दिलीपः दिलीपराज जेते) एनं=सिंहं सिंह प्रत्ये। प्रत्यब्रवीत्=प्रत्युवाच=बोलतो हवो ॥ ४२ ॥

नृपः एनं प्रत्यब्रवीत्	तत्पूर्वभङ्गे	इषुप्रयोगे	
वज्रपाणिः एनं प्रत्यब्रवीत्	वितथप्रयत्नः	सः	
वज्रपाणिः वज्रं मुमुक्षन्	वितथप्रयत्नः		वज्रपाणिः
(श्रणे स० क० प्र०)	मुमुक्षन्		
त्र्यम्ब० वज्रपा० जडी० (क०)	जडीकृतः		

(શુ૦ ભા૦) વજ્ર મારવાની ઇચ્છાવાળો અને મહાદેવના જોવાથી જ નિશ્ચેષ્ટ થયેલો તથા જેના હાથમાં વજ્ર છે એવા ઇન્દ્રની માફક દેખાતો, પ્રથમજ મિથ્યા થયેલા બાણના પ્રયોગમાં નિષ્ફલ પ્રયત્નવાળો દિલીપરાજા સિંહ સામે નીચે પ્રમાણે બોલ્યો. ॥ ૪૨ ॥

संरुद्धचेष्टस्य मृगेन्द्र कामं हास्यं वचस्तद्यदहं विवक्षुः ।
अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान्भावमतोऽभिधास्ये॥४३॥

(अन्वयः) हे मृगेन्द्र यत् (वचः) अहं विवक्षुः (अस्मि) संरुद्धचेष्टस्य (मे) तत् वचः कामं हास्यम् (अस्ति) हि भवान् प्राणभृतां अन्तर्गतं सर्वं भावं वेद । अतः अहं अभिधास्ये ॥४३॥

(टीका) हे मृगेन्द्र इन्दतीति इन्द्रः (कृ० व्यु०) मृगाणां इन्द्रः मृगेन्द्रः (ष० त०) तत्संबुद्धौ हे मृगेन्द्र । इन्दति समर्थ थाय जे ते इन्द्र कहीए । मृगाणां=हरिणानां हरिणो जे तेमनो इन्द्र जे स्वामी ते मृगेन्द्र कहीए । तत्सम्बुद्धौ तेना संबोधनमां हे मृगेन्द्र=हे सिंह । यत् जे (वचः वाक्यं वाक्य जे तेने) अहं हुं जेते विवक्षुः वक्तुं इच्छामि विवक्षामि (स० व्यु०) विवक्षामीति विवक्षुः (कृ० व्यु०) वक्तुं गदितुं बोलवानी इच्छामि इच्छा करू ते विवक्षामि कहीए । विवक्षामि बोलवानी इच्छा करूं ते विवक्षु कहीए । विवक्षुः= जिगादेषुः कहेवानी इच्छा वालो थवो । (अस्मि=छुं) संरुद्धचेष्टस्य सम्यक् रुद्धा संरुद्धा । संरुद्धा चेष्टा यस्य सः संरुद्धचेष्टः (ष० ब०) तस्य संरुद्धचेष्टस्य सम्यक् सारी रीते रुद्धा जे रोकायेली ते संरुद्धा कहीए । संरुद्धा=प्रतिबद्धा रोकाई छे चेष्टा व्यापार ते जेनो ते संरुद्धचेष्ट कहीए । संरुद्ध [illegible] =प्रतिब[illegible]व्यापारस्य रोकायो छे व्यापार ते जेनो थवो (मे=

मम मारुं) तत्=वक्ष्यमाणं आगळ कहेवामां आवशे ते । वचः=वाक्यं वाक्य जेते । कामं यथेष्टं अत्यन्त हास्यं हसितुं योग्यं हास्यं (कृ० व्यु०) हसितुं हसवाने जे योग्य ते हास्य कहीए । हास्यं=परिहसनीयं हसवा लायक (अस्ति छे) हि=घटे छे के । भवान्=त्वं तुं जेते । प्राणभृतां प्राणन्ति एभिरिति प्राणाः (कृ० व्यु०) प्राणान् बिभ्रतीति प्राणभृतः (कृ० व्यु० ष० त०) तेषां प्राणभृताम् । प्र[illegible]=जीवन्ति जीवे एभिः=आ वडे करीने ते प्राण कहीए । प्राणान्=असून् प्राणो जे तेमने बिभ्रति धारण करे जे ते प्राणभृत् कहीए । प्राणभृतां=प्राणिनां प्राणधारी पुरुषो जे तेमनो । अन्तर्गतं अन्तः गतः अन्तर्गतः तं अन्तर्गतं अन्तः अंदर गत जे प्राप्त थयेलो ते अन्तर्गत कहीए । अन्तर्गतं= हृद्गतं हृदयमां रहेलो एवो । सर्वं=अखिलं सर्व एवो । भावं=अभिप्रायं अभिप्राय जे तेने । वेद=जानाति जाणे छे । अतः=अस्मात्कारणात् ए कारणथी अहं हुं जेते अभिधास्ये=वक्ष्यामि कहीश ॥४३॥

वचः	अस्ति अ० क० प्र०	संरुद्ध[illegible]	मे
अहं	अस्मि अ० क० प्र०	कामं हास्यं तत्	वचः
अहं	अभिधास्ये अ०क०प्र०		
भवान्	भावं वेद स० क० प्र०	अन्तर्गतं सर्वं	भावं
अहं	वचः विवक्षुः स० क० प्र०		

(गु० भा०) હે સિંહ, વ્યાપાર જેનો રોકાઇ ગયો છે એવા મારૂં તે વચન ખૂબ હસવા લાયક છે કે જે વચન હું કહેવા ઇચ્છું છું. તો પણ આપ દરેક પ્રાણીઓના મનની દરેક વાત જાણો છો, તેથી આપને કહું છું (કહીશ) ॥ ૪૩ ॥

मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः ।
गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयम् ॥४४॥

(अन्वयः) स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः सः (शिवः) मे मान्यः (अस्ति) पुरस्तात् नश्यत् आहिताग्नेः गुरोः अपि इदं (गोरूपं) धनं (मया) अनुपेक्षणीयम् ॥४४॥

(टीका) स्थावरजङ्गमानां तिष्ठन्तीत्येवं शीलाः स्थावराः (कृ० व्यु०) जङ्गम्यन्ते इति जङ्गमाः (कृ० व्यु०) स्थावराश्च जङ्गमाश्च स्थावरजङ्गमाः (द्वं० स०) तेषां स्थावरजङ्गमानां। तिष्ठन्ति स्थिर रहेवानो छे शील स्वभाव ते जेमनो ते स्थावर कहीए जङ्गम्यन्ते चाले जे ते जङ्गम कहीए। स्थावर जे तरु शैलादि अने जङ्गम जे मनुष्यादि ते स्थावरजङ्गम कहीए। स्थावरजंगमानां=तरुशैलमनुष्यादीनां तरुशैलादि अने मनुष्यादि जे तेमनो। सर्गस्थितिप्रत्यवहारहेतुः सर्गश्च स्थितिश्च प्रत्यवहारश्च सर्गस्थितिप्रत्यवहाराः (द्वं० स०) सर्गस्थितिप्रत्यवहाराणां हेतुः सर्गस्थितिप्रत्यवहारहेतुः (ष० त०) सर्ग जे उत्पत्ति स्थिति जे पालन अने प्रत्यवहार जे प्रलय ते सर्गस्थितिप्रत्यवहार कहीए। सर्गस्थितिप्रत्यवहाराणां=उत्पत्तिपालनविनाशानां उत्पत्तिपालन अने प्रलय जे तेमनो हेतु जे कारण ते सर्गस्थितिप्रत्यवहारहेतु कहीए। सर्गस्थितिप्रत्यवहारहेतुः =उत्पत्तिपालनविनाशकारणं उत्पत्ति पालन अने संहारना कारणरूप एवा। सः=पूर्वोक्तः पूर्वे कहेला एवा (शिवः महादेव जेते) मे=मम मारे। मान्यः मानयितुं योग्यः मान्यः (कृ० व्यु०) मानयितुं पूजयितुं पूजा करवाने जे योग्य ते मान्य कहीए। मान्यः=पूज्यः पूजा करवा लायक (अस्ति=छे) पुरस्तात्=अग्रे आगळ। नश्यत् नश्यतीति नश्यत् (कृ० व्यु०) नश्यति नाश पामे जे ते नश्यत् कहीए। नश्यत्=प्रणश्यत् नाश पामतुं एवुं। आहिताग्नेः आहितः अग्निर्येन सः आहिताग्निः (तृ० ब०) तस्य आहिताग्नेः आहितः=स्थापितः स्थापन कर्यो छे अग्नि ते जेणे ते आहिताग्नि कहीए। आहिता-

ग्नेः=स्थापिताग्नेः अग्निहोत्री एवा। गुरोः गृणाति गुरुः(कृ० व्यु०)तस्य गुरोः गृणाति=उपदिशति उपदेश करे जे ते गुरु कहीए। गुरोः अपि=वसिष्ठस्य अपि वसिष्ठ गुरुनुं पण। इदं= आ (गोरूपं=गाय रूपी) धनं=धन जेते। (मया मारा वडे करीने) अनुपेक्षणीयम्। उपेक्षितुं योग्यं उपेक्षणीयम् (कृ० व्यु०) न उपेक्षणीयं अनुपेक्षणीयम् (न० त०) उपेक्षितुं उपेक्षा करवाने जे योग्य ते उपेक्षणीय कहीए। न= नहि जे उपेक्षणीय ते अनुपेक्षणीय कहीए। अनुपेक्षणीयं= उपेक्षितुं अयोग्यं (अर्थात् आदरणीयम्) उपेक्षा नहि करवा योग्य छे अर्थात् आदर करवा लायक छे ॥४४॥

सः अस्ति० अ० क० प्र०		सर्गस्थिति० मान्यः	सः
मया सः मान्यः			
मया धनं अनुपेक्षणीयम्		नश्यत् इदं अनुपेक्षणीयम्	धनम्
(वत्रे० क० प्र०)		आहिताग्नेः	गुरोः

(ગુ० ભા०) આ ચળાચળ જગતની ઉત્પત્તિ પાલન તથા સંહાર કરનાર તે મહાદેવજી મારે પૂજ્ય છે. અર્થાત્ મહાદેવજીની આજ્ઞા મારે પાળવી જોઇએ. તેમજ અગ્નિહોત્રી વસિષ્ઠગુરૂનું નાશ પામતું આ ગાયરૂપી ધન પણ મારે બેદરકારી કરવા લાયક નથી અર્થાત્ ગાયની પણ રક્ષા કરવી જોઇએ. ॥ ૪૪ ॥

स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद ॥
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥४५॥

(अन्वयः) सः त्वं मदीयेन देहेन शरीरवृत्तिं निर्वर्तयितुं प्रसीद। दिनावसानोत्सुकबालवत्सा इयं महर्षेः धेनुः (त्वया) विसृज्यताम् ॥४५॥

(टीका) सः=पूर्वोक्तः आगतसत्त्ववृत्तिः पासे आवेला प्राणीओ उपर जीवन चलावनारो एवो। त्वं=सिंहः तुं जेते।

मदीयेन मम अयं मदीयः (त० व्यु०) तेन मदीयेन मम मारो अयं जे आ ते मदीय कहीए । मदीयेन =मामकेन मारा । देहेन=कायेन शरीरवडे करीने । शरीरवृत्तिं शीर्यते इति शरीरं (कृ० व्यु०) शरीरस्य वृत्तिः शरीरवृत्तिः (ष० त०) तां शरीरवृत्तिं । शीर्यते जीर्ण थायजे ते शरीर कहीए । शरीरस्य शरीर जे तेनी वृत्ति जे जीवन ते शरीरवृत्ति कहीए । शरीरवृत्तिं=देहजीवनं देहना निर्वाह जे तेने । निर्वर्तयितुं=सम्पादयितुं संपादन करवाने माटे । प्रसीद =प्रसन्नो भव प्रसन्न था । दिनावसानोत्सुकबालवत्सा बालश्चासौ वत्सश्च बालवत्सः (वि० पू० क०) दिनस्य अवसानं दिनावसानम् (ष०त०) दिनावसाने उत्सुकः दिनावसानोत्सुकः (स०त०) दिनावसानोत्सुकः बालवत्सो यस्याः सा दिनावसानोत्सुकबालवत्सा (ष० ब०) बालः नानो एवो वत्स जे तरणक ते बालवत्स कहीए । दिनस्य=दिवस जेतेनी अवसान जे समाप्ति ते दिनावसान कहीए । दिनावसाने=सायंकाले सायंकालने विषे उत्सुक जे उत्कण्ठित ते दिनावसानोत्सुकः कहीए । दिनावसानोत्सुकः सायंकालने विषे उत्कण्ठित छे बालवत्स ते जेनो ते दिनावसानोत्सुकबालवत्सा कहीए । दिनावसानोत्सुकबालवत्सा=सायंकालोत्कण्ठितशिशुवत्सका सायंकालने विषे उत्साह वाळो छे नानो वाछडो ते जेनो एवी। इयं=एषा आ एवी । महर्षेः महांश्चासौ ऋषिश्च महर्षिः (वि० पू० क०) तस्य महर्षेः महान् मोटा एवा ऋषि जे मुनि ते महर्षि कहीए । महर्षेः=वसिष्ठस्य वसिष्ठमुनि जे तेमनी । धेनुः=गौः गाय जेते । (त्वया तारा वडे करीने) विसृज्यतां =त्यज्यतां त्याग कराओ ॥४५॥

त्वं	प्रसीद् अ० क० प्र०	सः	त्वं
त्वया धेनुः	विसृज्यताम् क०	मदीयेन	देहेन
त्वया शरीर०	निर्व०भा०कृ०	दिनाव० इयं,	धेनुः

(ગુ૦ ભા૦) હે સિંહ, પાસે આવેલા પ્રાણીઓ ઉપરજ જીવન ચલાવનાર તું મારા દેહવડે પોતાની ભૂખ દૂર કરવા (મટાડવા) ને માટે પ્રસન્ન થા. અને સાયંકાલે ઉત્કંઠિત વાછડાવાળી આ વસિષ્ઠ મુનિની ગાયને તું છોડી દે ॥ ૪૫ ॥

अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् ।
भूयः स भूतेश्वरपार्श्ववर्ती किञ्चिद्विहस्यार्थपतिं बभाषे ॥४६॥

(अन्वयः) अथ भूतेश्वरपार्श्ववर्ती सः गिरिगह्वराणां अन्धकारं दंष्ट्रामयूखैः शकलानि कुर्वन् (सन्) किञ्चित् विहस्य अर्थपतिं भूयः बभाषे ॥४६॥

(टीका) अथ=दिलीपोक्त्यनन्तरं दिलीपना बोल्या पछी। भूतेश्वरपार्श्ववर्ती ईष्टेऽसौ ईश्वरः (कृ० व्यु०) पार्श्वे वर्तते इति पार्श्ववर्ती (कृ० व्यु० स० त०) भूतानां ईश्वरः भूतेश्वरः (ष० त०) भूतेश्वरस्य पार्श्ववर्ती भूतेश्वरपार्श्ववर्ती (ष० त०) ईष्टे समर्थ थाय जे ते ईश्वर कहीए। पार्श्वे पडखाने विषे वर्तते वर्तेजे ते पार्श्ववर्तिन् कहीए। भूतानां=प्राणिनां प्राणिओ जे तेमनो ईश्वर जे स्वामी ते भूतेश्वर कहीए। भूतेश्वरस्य=शिवस्य शिव जे तेनो पार्श्ववर्ती जे अनुचर ते भूतेश्वरपार्श्ववर्तिन् कहीए। भूतेश्वरपार्श्ववर्ती=शिवानुचरः शिवनो सेवक एवो। सः=सिंहः ते सिंह जेते। गिरिगह्वराणां गिरेः गह्वराणि गिरिगह्वराणि (ष० त०) तेषां गिरिगह्वराणं गिरेः हिमालयस्य हिमालय जेतेनी गह्वर जे गुफाओ ते गिरिगह्वर कहीए। गिरिगह्वराणां=हिमालयपर्वतकन्दराणां हिमालयनी गुफाओ जेतेमना। अन्धकारं=ध्वान्तं अन्धकार जेतेने। दंष्ट्रामयूखैः दंष्ट्राणां मयूखाः दंष्ट्रामयूखाः (ष० त०) तैः दंष्ट्रामयूखैः। दंष्ट्राणां=दाढो जे तेमनां मयूख जे किरण ते दंष्ट्रामयूख कहीए। दंष्ट्रामयूखैः=दंष्ट्राकिरणैः दाढोनां किरणो जे तेमणे करीने। शकलानि=खण्डानि टुकडाओ जे तेमने।

कुर्वन् करोतीति कुर्वन् (कृ० व्यु०) करोति करे जे ते कुर्वत् कहीए। कुर्वन् सन्=विदधत् सन् करतो सतो। किञ्चित्=ईषत् थोडुं। विहस्य=हसित्वा हसीने। अर्थपतिम् पातीति पतिः (कृ० व्यु०) अर्थानां पतिः अर्थपतिः (ष० त०) तं अर्थपतिम्। पाति रक्षति रक्षण करेजे ते पति कहीए। अर्थानां=धनानां धन जे तेमनो पति जे स्वामी ते अर्थपति कहीए। अर्थपतिं=धनाधिपं दिलीपं दिलीपराजा जे तेने। भूयः=पुनः फरीथी बभाषे=उवाच बोलता हवो ॥ ४६ ॥

सः अर्थपतिं बभाषे स०	भूतेश्वरपार्श्व० सः
सः शक० कुर्वन् स०	कुर्वन् (विधेय) सः

(ગુ० ભા०) દિલીપરાજાને બોલી રહ્યા બાદ મહાદેવજીની સમીપ રહેનારો તે સિંહ પોતાની દાઢોની કાન્તિથી હિમાલયની ગુફાના અંધકારને ટુકડા કરતો કરતો કંઇક હસીને દિલીપરાજા પ્રત્યે ફરીથી બોલ્યો. ॥ ૪૬ ॥

एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च।
अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वम्॥४७॥

(अन्वयः) एकातपत्रं जगतः प्रभुत्वं (च) नवं वयः (च) इदं कान्तं वपुः (एतत् सर्वं) बहु अल्पस्य हेतोः (धेन्वर्थं) हातुं इच्छन् त्वं मे विचारमूढः प्रतिभासि ॥४७॥

(टीका) एकातपत्रं, आतपात् त्रायते इति आतपत्रं (कृ० व्यु० पं० त०) एकं आतपत्रं यस्मिंस्तत् एकातपत्रं (स०ब०) तत् एकातपत्रम्। आतपात्=तापात् ताप थकी त्रायते रक्षण करे जे ते आतपत्र कहीए। एकं एक छे आतपत्र छत्र ते जेमां ते एकातपत्र कहीए। एकातपत्रं=एकच्छत्रं एकच्छत्र-वालुं एवुं। जगतः गच्छतीति जगत् (कृ० व्यु०) तस्य जगतः गच्छति=उत्पत्तिस्थितिलयान्प्राप्नोति उत्पत्ति स्थिति अने लयने पामे ते जगत् कहीए। जगतः=विश्वस्य मर्त्यलो-

कस्य जगत् जे तेनुं। प्रभुत्वं प्रभोः भावः प्रभुत्वं (त० ष्यु०) तत् प्रभुत्वं । प्रभोः स्वामी जेतेनो भाव जे धर्म ते प्रभुत्व कहीए। प्रभुत्वं=स्वामित्वं स्वामिपणुं जे तेने । (च=अने) नवं=नूतनं नूतन एवुं । वयः=यौवनं यौवन जे तेने (च= अने) इदं=एतत् आ । कान्तं=सुन्दरं सुन्दर एवुं । वपुः= शरीरं शरीर जे तेने । (एतत्सर्वं=आ बधुं) बहु=बहुलं बहु जे तेने। अल्पस्य=स्तोकस्य थोडा हेतोः=कारण चार्थे कारणने माटे (धेन्वर्थं=नन्दिनीने माटे) हातुं=त्यक्तुं त्याग करवाने । इच्छन् इच्छसीति इच्छन् (कृ० त्यु०) इच्छसि इच्छा करे जे ते इच्छत् कहीए इच्छन्=वाञ्छन् इच्छा करतो एवो । त्वं= भवान् तुं जेते । मे=मम मने । विचारमूढः विचारे मूढः विचारमूढः (स० त०) विचारे=कार्याकार्यविमर्षे कार्याकार्य विचारने विषे मूढ जे मूर्ख ते विचारमूढ कहीए । विचार· मूढः=कार्याकार्यविमर्षशून्यः कार्याकार्यविचारने विषे मूर्ख एवो । प्रतिभासि=लक्ष्यसे जणाय छे ॥ ४७ ॥

त्वं प्रतिभासि।	एकातपत्रं प्रभुत्वं
(अ० क० प्र०)	नवं वयः
त्वया प्रभुत्वं हातुं	इदं } वपुः
त्वया वयः हातुम्	कान्तं }
त्वया वपुः हातुम्	अल्पस्य हेतोः
त्वया बहु हातुम्	इच्छन् } त्वं
(बधा कृ० भा० प्र०)	विचारमूढः }

(गु० भा०) हे दिलीपराजा એક છત્રવાળું જગતનું ચક્રવર્તિ રાજ્ય, નવી યુવાની, અને સુન્દર આ શરીર આ બધું થોડાજ કારણથી (ફક્ત એક ગાયનાજ કારણથી) છોડવાની ઇચ્છાવાળો તું મને કાર્યાકાર્ય વિચારમાં મૂર્ખ જણાય છે. ॥ ૪૭ ॥

भूतानुकम्पा तव चेदियं गौरेका भवेत् स्वस्तिमती त्वदन्ते ।
जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि॥४८॥

(अन्वयः) तव भूतानुकम्पा चेत् (अस्ति तर्हि) त्वदन्ते (सति) एका (एव) इयं गौः स्वस्तिमती भवेत् । (किन्तु) हे प्रजानाथ (त्वं) जीवन् (सन्) पुनः पिता इव प्रजाः उपप्लवेभ्यः शश्वत् पासि ॥४८॥

(टीका) तव=भवतः तने । भूतानुकम्पा भूतेषु अनुकंपा भूतानुकम्पा (स० त०) भूतेषु=प्राणिषु प्राणीओने विषे अनुकम्पा जे दया ते भूतानुकम्पा कहीए । भूतानुकम्पा=प्राणिदया प्राणिओने विषे दया जेते चेत्=यदि जो (अस्ति=छे तर्हि=तो) त्वदन्ते तव अन्तः त्वदन्तः (ष० त०) तस्मिन् त्वदन्ते तव तारो अन्त जे नाश ते त्वदन्त कहीए । त्वदन्ते सति=भवद्विनाशे सति तारो नाश थये सते । एका=एकाकिनी (एव) एकज । इयं=एषा मदाक्रान्ता माराथी आक्रमण करायेली आ गौः=धेनुः गाय जेते । स्वस्तिमती स्वस्ति अस्ति अस्याः इति स्वस्तिमती (त० व्यु०) स्वस्ति=कल्याणं कल्याण जेते अस्ति छे अस्याः आने ते स्वस्तिमती कहीए । स्वस्तिमती=कल्याणवती कल्याणवाळी भवेत्=स्यात् थाय । (किन्तु =पण) हे प्रजानाथ प्रकर्षेण जायन्ते स्म इति प्रजाः (कृ० व्यु०) प्रजानां नाथः प्रजानाथः (ष० त०) तत्सम्बुद्धौ हे प्रजानाथ । प्रकर्षेण=उत्कर्षेण उत्कर्ष वडे करीने जायन्ते स्म उत्पन्न थायजे ते प्रजा कहीए । प्रजानां=जनानां प्रजाओ जे तेमनो नाथ जे स्वामी ते प्रजानाथ कहीए । तत्सम्बुद्धौ तेना संबोधनने विषे हे प्रजानाथ=हे जनपते दिलीप हे दिलीप राजा (त्वं=तुं जेते) जीवन् जीवसीति जीवन् (कृ० व्यु०) जीवसि जीवे जे ते जीवत् कहीए । जीवन् (सन्)=प्राणान्धारयन् (सन्) जीवतो सतो । पुनः=भूयः फरीथी पिता

इव=जनकः इव बाप जे तेज जेम एम । प्रजाः प्रकर्षेण जायन्ते स्म इति प्रजाः (कृ० व्यु०) ताः प्रजाः । प्रकर्षेण=उत्कर्षेण उत्कर्ष वडे करीने जायन्ते उत्पन्न थाय जे ते प्रजा कहीए । प्रजाः=जनान् लोको जे तेमने उपप्लवेभ्यः=उपद्रवेभ्यः विघ्नो थकी । शश्वत्=सदा निरन्तर । पासि=रक्षसि रक्षण करे छे ॥४८॥

भूतानुकंपा अस्ति अ०	इयं एका } गौः
गौः भवेत् अ०	स्वस्तिमती=(विधेय) गौः
त्वम् जीवन् अ०	जीवन् (विधेय) त्वं.
त्वं प्रजाः पासि स०	
पिता प्रजाः पाति स०	

(गु० भा०) जो तने प्राणीओ उपर दया होय तो तारो नाश थये एकज आ गाय जीवती रहेशे (बचवानी छे) पण हे राजा तुं जीवतो होइश तो बाप जेम पोतानी संततिनुं अनेक दुःखोमांथी रक्षण करे छे तेम तुं पण अनेक विघ्नोमांथी प्रजानुं रक्षण करीश. ॥ ४८ ॥

अथैकधेनोरपराधचण्डाद् गुरोः कृशानुप्रतिमाद्विभेषि ॥
शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः ४९

(अन्वयः) अथ एकधेनोः (अत एव) अपराधचण्डात् (अतएव) कृशानुप्रतिमात् गुरोः (त्वं) बिभेषि ! (तर्हि) घटोध्नीः कोटिशः गाः स्पर्शयता भवता अस्य मन्युः विनेतुं शक्यः (अस्ति) ॥४९॥

(टीका) अथ=यदि जो (अथ=अथवा पक्षान्तरे बीजा पक्षने विषे) एकधेनोः एका एव धेनुर्यस्य सः एकधेनुः (ष. व.) तस्मात् एकधेनोः । एका एव=एकज छे धेनु गाय ते जेने ते एकधेनु कहीए। एकधेनोः=अद्वितीयगोः एकज गाय वाला (अत एव=एटलाज माटे) अपराधचण्डात् । अपराधे

चण्डः अपराधचण्डः (स० त०) तस्मात् अपराधचण्डात् । अपराधे अपराधने विषे चण्ड जे अत्यन्त क्रुद्ध ते अपराधचण्ड कहीए । अपराधचण्डात्=अपराधात्यन्तकोपनात् अपराधमां अधिक कोपवालो एवो (अत एव=एटलाज हेतुथी) कृशानुप्रतिमात् । कृशानुः प्रतिमा यस्य सः कृशानुप्रतिमः (ष० ब०) तस्मात् कृशानुप्रतिमात् । कृशानुः=अग्निः अग्नि छे प्रतिमा उपमा ते जेनी ते कृशानुप्रतिम कहीए । कृशानुप्रतिमात्=अग्नितुल्यात् अग्नि छे उपमा ते जेनी एवो । गुरोः गृणातीति गुरुः (कृ० व्यु०) तस्मात् गुरोः गृणाति=उपदिशति उपदेश करे जे ते गुरु कहीए । गुरोः=वसिष्ठात् वसिष्ठ गुरु थकी (त्वं तुंजेते) बिभेषि=भयं प्राप्नोषि बीवे छे शुं ? (तर्हि=तो) घटोध्नीः घटाः इव ऊधांसि यासान्ताः घटोध्न्यः (ष० ब०) ताः घटोध्नीः । घटाः इव घडा सरखा छे ऊधांसि आउ ते जेमना ते घटोध्नी कहीए । घटोध्नीः= कलशस्तनीः घडा सरखा आऊ वाली एवी कोटिशः। कोटयः इति कोटिशः (त०व्यु०) कोटयः करोडो ते कोटिशस् कहीए कोटिशः=बहुकोटिपरिसंख्याकाः करोडो एवी । गाः= धेनूः गायो जे तेमने । स्पर्शयता स्पर्शयतीति स्पर्शयन् (कृ० व्यु०) तेन स्पर्शयता । स्पर्शयति=प्रतिपादयति आपेजे ते स्पर्शयत् कहीए स्पर्शयता=प्रतिपादयता आपतो एवो । भवता= त्वया तुं जे तेणे । अस्य=गुरोः वसिष्ठस्य आ वसिष्ठगुरु जे तेनो मन्युः=क्रोधः क्रोध जेते । विनेतुं=अपनेतुं दूर करवाने ([illegible]) शक्यः शक्तुं योग्यः शक्यः (कृ०व्यु०) शक्तुं समर्थ थवाने जे योग्य ते शक्य कहीए । शक्यः=पारणीयः समर्थ थवाने योग्य एवो (अस्ति छे) ॥४९॥

त्वं	बिभेषि अ०	एकधे० अपरा०	} गुरोः
मन्युः	अस्ति अ०	कृशानुप्र०	

त्वया मन्युः शक्यः क०
भवता मन्युः विनेतुम् ।
(भा० कृ० प्र०)

घटोध्नीः } गाः
कोटिशः
स्पर्शयता भवता
शक्यः मन्युः

(ગુ૦ ભા૦) યદિ એકજ ગાય હોવાથી આ ગાયનો નાશ થયા પછી બીજી ગાય ન હોવાને લીધે અત્યન્ત ક્રુદ્ધ થયેલા એટલા-જ માટે સાક્ષાત્ અગ્નિ સ્વરૂપ દેખાતા વસિષ્ઠ ગુરૂથી શું તું બીએ છે ? જો એમજ હોય તો ઘડાના જેવા આઉ વાળી કરોડો ગાયોને આપીને તું એમનો ક્રોધ દૂર કરી શકીશ. ॥ ૪૯ ॥

तद्रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ॥५०॥

(अन्वयः) तत् कल्याणपरम्पराणां भोक्तारं ऊर्जस्वलं आत्मदेहं (त्वं) रक्ष । हि ऋद्धं राज्यं महीतलस्पर्शनमात्रभिन्नं ऐन्द्रं पदं (लोकाः) आहुः ॥५०॥

(टीका) तत्=तस्मात्कारणात् ते कारणथी । कल्याण-परम्पराणां कल्याणानां परम्पराः कल्याणपरम्पराः (ष० त०) तासां कल्याणपरम्पराणां । कल्याणानां कल्याणो जे तेमनी परम्परा जे पंक्तिओ ते कल्याणपरम्परा कहीए । कल्याण-परम्पराणां=मंगलसन्ततीनां कल्याणनो पंक्तिओ जे तेमनो भोक्तारं भुनक्तीति भोक्ता (कृ० व्यु०) तं भोक्तारं भुनक्ति भोगवे जे ते भोक्तृ कहीए । भोक्तारं=उपभोक्तारं भोगवतो एवो । ऊर्जस्वलं ऊर्जः अस्ति अस्य इति ऊर्जस्वलः (त० व्यु०) तं ऊर्जस्वलम् । ऊर्जः=बलं जेते अस्ति छे अस्य आने ते ऊर्जस्वल „ कहीए । ऊर्जस्वलं=महाबलं बलवान् एवो । आत्मदेहं आत्मनः देहः आत्मदेहः (ष० त०) तं आत्मदेहं । आत्मनः पोतानो देह जे शरीर ते आत्मदेह

कहीए। आत्मदेहं=स्वशरीरं पोताना शरीरने (त्वं तुं जेते) रक्ष=गोपाय रक्षण कर। हि=यस्मात्कारणात् कारण के। ऋद्धं =समृद्धं समृद्धिवालुं एवुं। राज्यं राज्ञः कर्म राज्यं (त०व्यु०) तत् राज्यं। राज्ञः=नृपस्य राजा जे तेनुं जे कर्म ते राज्य कहीए। राज्यं राज्य जे तेने। महीतलस्पर्शनमात्रभिन्नं मह्याः तलं महीतलं (ष० त०) महीतलस्य स्पर्शनं महीतलस्पर्शनं (ष० ब०) महीतलस्पर्शनं एव इति महीतलस्पर्शनमात्रं (मयूरव्यंसकादित्वात्समासः) महीतलस्पर्शनमात्रेण भिन्नं महीतलस्पर्शनमात्रभिन्नं (तृ० त०) तत् महीतलस्पर्शनमात्रभिन्नम्। मह्याः=पृथिव्याः पृथिवी जे तेनु तल जे तळीयुं ते महीतल कहीए। महीतलस्य महीतल जे तेनुं स्पर्शन जे स्पर्श ते महीतलस्पर्शन कहीए। महीतलस्पर्शनं एव पृथ्वीना तळीआनो स्पर्श करवो एज ते महीतलस्पर्शनमात्र कहीए। महीतलस्पर्शनमात्रेण महीतलस्पर्शनमात्र जे तेणे करीने भिन्न जे जुदुं ते महीतलस्पर्शनमात्रभिन्न कहीए। महीतलस्पर्शनमात्रभिन्नं=भूतलसम्बन्धमात्रभिन्नं भूतलना सम्बन्धमात्रथी जुदु एवुं। ऐन्द्रं इन्द्रस्य इदं ऐन्द्रम् (त० व्यु०) तत् ऐन्द्रम्। इन्द्रस्य इन्द्र संबन्धी इदं जे आ ते ऐन्द्र कहीए। ऐन्द्रं=इन्द्रसम्बन्धि इन्द्र संबन्धी। पदं=स्थानं स्थान जे तेने (लोकाः लोको जेते) आहुः=वदन्ति कहे छे ॥ ५० ॥

त्वं आत्मदेहं रक्ष स०	भोक्तारं ऊर्जस्व० आत्मदेहम्
लोकाः राज्यं आहुः स०	ऋद्धं......राज्यम्
लोकाः पदं आहुः स०	महीत० ऐन्द्रं......पदम्

(गु० भा०) ते कारणुथी उत्तरोत्तर अनेक श्रेयने भोगवनार बळवान एवा पोताना देहनुं तुं रक्षण कर. कारण के समृद्धिवाळा तारा राज्यने लोक ईन्द्रपदना तुल्य कहे छे. फक्त पृथ्वीनो संबंध थवाथीज तारुं राज्य ईन्द्रपदथी जुदु छे ॥ ५० ॥

एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन ।
शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ॥५१॥

(अन्वयः) एतावत् उक्त्वा मृगेन्द्रे विरते (सति) गुहागतेन अस्य प्रतिस्वनेन शिलोच्चयः अपि प्रीत्या तं एव अर्थं क्षितिपालं उच्चैः अभाषत इव ॥५१॥

(टीका) एतावत् एतत्परिमाणं अस्ति अस्येति एतावत् (त० व्यु०) तत् एतावत् । एतत्परिमाणं आ परिमाण अस्ति छे अस्य आने ते एतावत् कहीए । एतावत्=एतावत्पर्यन्तम् एटलुं । उक्त्वा=कथयित्वा कहीने । मृगेन्द्रे मृगाणां इन्द्रः मृगेन्द्रः (ष० त०) तस्मिन् मृगेन्द्रे । मृगाणां=हरिणानां हरिणो जे तेमनो इन्द्र जे स्वामी ते मृगेन्द्र कहीए । मृगेन्द्रे=सिंहे सिंह जेते । विरते सति=मौनीभूते सति विराम पामे सते (चुप रहे सते) गुहागतेन गुहां गतः गुहागतः (द्वि० त०) तेन गुहागतेन । गुहां गुहा जे तेने गत जे प्राप्त थयेल ते गुहागत कहीए । गुहागतेन=कन्दरगतेन गुफाने प्राप्त थयेलो एवो । अस्य=पुरोवर्तिनः सिंहस्य आ सिंह जे तेना । प्रतिस्वनेन=प्रतिध्वनिना पडघा वडे करीने । शिलोच्चयः । शिलानां उच्चयः शिलोच्चयः (ष० त०) शिलानां=पाषाणानां पाषाणो जे तेमनो उच्चय जे समूह ते शिलोच्चय कहीए । शिलोच्चयः अपि=शैलः अपि हिमालय पर्वत जेते पण प्रीत्या=प्रेम्णा प्रीति वडे करीने । तं एव अर्थम्=सिंहोक्तवाक्यमेव सिंहे कहेला वाक्यनेज (तेज अर्थ जेतेने) क्षितिपालं क्षितिं पालयतीति क्षितिपालः (कृ०व्यु० ष० त०) तं क्षितिपालं । क्षितिं=पृथ्वीं पृथ्वी जे तेने पालयति=रक्षति रक्षण करे जे ते क्षितिपाल कहीए । क्षितिपालं=भूमिपं दिलीपं दिलीपराजा जे तेने । उच्चैः=उच्चस्वरेण उंचा स्वर

वडे करीने। अभाषत इव=अवोचत इव कहेतो होयने अ
शुं ? ॥ ५१ ॥

विलोमान्वयः अर्थं क्षितिपालं अभाषत इव (द्वि० क० प्र०)	विरते (विधेय) मृगेन्द्रे गुहागतेन प्रतिस्वनेन तम् अर्थम्

(ગુ૦ ભા૦) આટલું બોલીને સિંહ ચુપ રહ્યો એટલે પર્વત પણ ગુફામાંથી પ્રાપ્ત થયેલા (નીકળેલા) પડઘા વડે પ્રેમથી તેજ વાત દિલીપ રાજાને કહેતો હોયને શું ? ॥ ૫૧ ॥

निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच ।
धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ५२

(अन्वयः) मनुष्यदेवः देवानुचरस्य वाचं निशम्य तदध्यासितकातराक्ष्या धेन्वा निरीक्ष्यमाणः (अतः) सुतरां दयालुः (सन्) पुनः अपि उवाच ॥ ५२ ॥

(टीका) मनुष्यदेवः मनुष्याणां देवः मनुष्यदेवः (ष० त०) मनुष्याणां=जनानां मनुष्यो जे तेमनो देव जे राजा ते मनुष्यदेव कहीए । मनुष्यदेवः=राजा दिलीपः दिलीपराजा जेते । देवानुचरस्य अनुचरतीति अनुचरः (कृ० व्यु०) देवस्य अनुचरः देवानुचरः (ष० त०) तस्य देवानुचरस्य । अनु=पश्चात् पाछळ चरति=गच्छति गति करे जे ते अनुचर कहीए । देवस्य=शिवस्य शंकर जे तेमनो अनुचर जे सेवक ते देवानुचर कहीए । देवानुचरस्य=शिवकिंकरस्य सिंहस्य सिंह जे तेनी । वाचं=वाणीं वाणी जे तेने । निशम्य=श्रुत्वा सांभळीने । तदध्यासितकातराक्ष्या तेन अध्यासितं तदध्यासितं (तृ० त०) तदध्यासितेन कातरे तदध्यासितकातरे (तृ० त०) तदध्यासितकातरे अक्षिणी यस्याः सा तदध्यासितकातराक्षी (ष० ब०) तया तदध्यासितकातराक्ष्या । तेन=

सिंहेन सिंह जे तेणे अध्यासित जे आक्रमण=दबाववुं ते तदध्यासित कहीए। तदध्यासितेन=सिंहना दबाववा वडे करीने कातर जे रांक=गरीब ते तदध्यासितकातर कहीए। तदध्यासितकातरे=सिंहना आक्रमण करवाथी कातर छे अक्षिणी नेत्र ते जेनां ते तदध्यासितकातराक्षी कहीए। तदध्यासितकातराक्ष्या=सिंहाक्रमणभयचकितदृष्ट्या सिंहना दबाववा वडे करीने रांक छे नेत्र ते जेनां एवी। धेन्वा=गवा नन्दिन्या नन्दिनी गाय जे तेणे। निरीक्ष्यमाणः निरीक्ष्यतेऽसौ निरीक्ष्यमाणः (कृ० व्यु०) निरीक्ष्यते जोवाय जे ते निरीक्ष्यमाण कहीए। निरीक्ष्यमाणः=अवलोक्यमानः जोवातो एवो। (अतः ए कारणथी) सुतरां=अत्यन्तं अत्यन्त। दयालुः दयतेऽसौ दयालुः (कृ० व्यु०) दयते दया करे जे ते दयालु कहीए। दयालुः (सन्)=कृपालुः (सन्) दया वाळो सतो। पुनः अपि=भूयः अपि फरीथी पण। उवाच=जगाद बोलतो हवो ॥५२॥

मनुष्यदेवः	उवाच अ०	तदध्यासित०	धेन्वा
मनुष्यदेवेन वाचं निशम्य भा०		निरीक्ष्यमाणः	[illegible]:
धेन्वा निरीक्ष्य भा०		दयालुः (विधेय)	

(ગુ० ભા०) આવું સિંહનું બોલવું સાંભળીને સિંહના દબાવવાથી જેનાં નેત્ર દીન થઇ ગયેલાં છે એવી નન્દિની ગાયથી જોવાતો એટલા માટે અત્યન્ત દયાલુ એવો તે દિલીપરાજા ફરીથી પણ નીચે પ્રમાણે સિંહને કહેવા લાગ્યો ॥ ૫૨ ॥

क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ॥ ५३ ॥

(अन्वयः) क्षतात् त्रायते इति उदग्रः क्षत्रस्य शब्दः भुवनेषु रूढः (अस्ति) किल। तद्विपरीतवृत्तेः (क्षत्रस्य

मम) राज्येन किं ? वा उपक्रोशमलीमसैः प्राणैः किम् (अस्ति) ॥ ५३ ॥

(टीका) क्षतात्=नाशात् नाश थकी । त्रायते=रक्षति रक्षण करे । इति=इत्थं व्युत्पत्या आवी व्युत्पत्ति वडे करीने । उदग्रः=उन्नतः उन्नत थवो । क्षत्रस्य क्षणोतीति क्षत् (कृ० व्यु०) क्षतः त्रायते इति क्षत्रः (कृ० व्यु० पं० त०) तस्य क्षत्रस्य । क्षणोति=नाश करे जे ते क्षत् कहीए । क्षतः= नाशात् नाश थकी त्रायते रक्षण करे जे ते क्षत्र कहीए । क्षत्रस्य=क्षत्रवर्णस्य क्षत्रवर्ण जे तेनो । शब्दः=वाचकः शब्द जेते । भुवनेषु=लोकेषु लोकने विषे । रूढः=प्रसिद्धः प्रसिद्ध थवो (अस्ति छे) किल निश्चितं निश्चय । तद्विपरीतवृत्तेः तस्य विपरीता तद्विपरीता (ष० त०) तद्विपरीता वृत्तिर्यस्य सः तद्विपरीतवृत्तिः (ष० ब०) तस्य तद्विपरीतवृत्तेः । तस्य=क्षत्रशब्दस्य ते क्षत्रशब्द जे तेना विपरीत जे विरुद्ध ते तद्विपरीत कहीए । तद्विपरीता क्षत्रवर्णना विरुद्ध छे वृत्ति व्यापार ते जेनो ते तद्विपरीतवृत्ति कहीए । तद्विपरीतवृत्तेः=क्षत्रशब्दविरुद्धव्यापारस्य क्षत्रशब्दना विरुद्ध छे व्यापार ते जेनो थवो (क्षत्रस्य मम क्षत्रिय थवा मने) राज्येन राज्ञः कर्म राज्यं (त० व्यु०) तेन राज्येन । राज्ञः= नृपस्य राजा जे तेनुं जे कर्म ते राज्य कहीए । राज्येन= राज्य वडे करीने किं=किं प्रयोजनमस्ति ? शुं प्रयोजन छे । वा=अथवा उपक्रोशमलीमसैः उपक्रोशेन मलीमसाः उपक्रोशमलीमसाः (तृ० त०) तैः उपक्रोशमलीमसैः । उपक्रोशेन= निन्दया निन्दा जे तेणे करीने मलीमस जे मलीन ते उपक्रोशमलीमस कहीए । उपक्रोशमलीमसैः=निन्दामलिनैः निन्दा वडे करीने मेला थवा । प्राणैः प्राणन्ति एभिः इति प्राणाः (कृ० व्यु०) तैः=प्राणैः । प्राणन्ति=जीवन्ति जीवे एभिः आ

वडे करीने ते प्राण कहीए। प्राणैः=असुभिः प्राणो वडे करीने। किं=किंप्रयोजनमस्ति ? शुं प्रयोजन छे ? अर्थात् किमपि प्रयोजनं नास्ति=कंइ पण प्रयोजन नथी ॥ ५३ ॥

शब्दः	अस्ति	उदग्रः रूढः	शब्दः
किं	अस्ति	तद्विपरीत० क्षत्रस्य	मम
(बन्ने अ० क० प्र०)		उपक्रोशमलीमसैः प्राणैः	

(ગુ૦ ભા૦) ક્ષત્રિય શબ્દનો શબ્દાર્થ 'આપત્તિમાંથી રક્ષણ કરનાર' એ પ્રમાણે સંસારમાં પ્રસિદ્ધ છે, તેથી વિરૂદ્ધ આચરણ કરનાર (અર્થાત્ નાશમાંથી ન રક્ષણ કરનાર) મને આ રાજ્યથી અથવા અપકીર્તિથી મલીન થયેલા પ્રાણો વડે કરીને શો લાભ છે ? અર્થાત્ નિન્દિત જીવનથી કોઈ પણ લાભ નથી સમજતો ॥ ५३ ॥

कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम् ।
इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयाऽस्याम् ॥५४॥

(अन्वयः) महर्षेः अनुनयः अन्यपयस्विनीनां विश्राणनात् कथं नु शक्यः (अस्ति) (हि त्वं) इमां सुरभेः अनूनां अवेहि। त्वया तु अस्याम् रुद्रौजसा प्रहृतं (अस्ति) ॥५५॥

(टीका) महर्षेः महांश्चासौ ऋषिश्च महर्षिः (त्रि० पू० क०) तस्य महर्षेः महान् मोटा एवा ऋषि जे मुनि ते महर्षि कहीए। महर्षेः=वसिष्ठस्य वसिष्ठमुनि जे तेमनो। अनुनयः= क्रोधापनयः क्रोधनुं दूर करवुं जेते। अन्यपयस्विनीनां प्रशस्तं पयो विद्यते आसामिति पयस्विन्यः (त० व्यु०) अन्याश्च ताः पयस्विन्यश्च अन्यपयस्विन्यः (वि० पू० क०) तासां अन्यपयस्विनीनाम्। प्रशस्तं श्रेष्ठ पयः दुध जेते विद्यते छे

आसां आमने ते पयस्विनी कहीए । अन्याः बीजी एवी पयस्विनी जे गायो ते अन्यपयस्विनी कहीए । अन्यपयस्विनीनां =अन्यधेनूनां बीजी दुझणी गायोना । विश्राणनात्=दानात् दान थकी । कथं केन प्रकारेण इति कथं (त० व्यु०) केन कया प्रकारेण प्रकार वडे करीने ते कथं कहीए । कथं नु= केन प्रकारेण वा केवी रीते । शक्यः शक्तुं योग्यः शक्यः (कृ० व्यु०) शक्तुं समर्थ थवाने जे योग्य ते शक्य कहीए । शक्यः शक्य एवो (अस्ति छे) (हि=[illegible] त्वं तुं जेते) इमां=नन्दिनीं गाम् आ नन्दिनी गाय जे तेने सुरभेः=कामधेनोः कामधेनु थकी । अनूनां न ऊना अनूना (न० त०) तां अनूनाम् न=नहि ऊना जे न्यून ते अनूना कहीए । अनूनां=अन्यूनां ओछी नहि एवीने । अवेहि=जानीहि जाण । त्वया तु=भवता तु तारा वडे करीने तो । अस्यां=गवि आ गायने विषे । रुद्रौजसा । रुद्रस्य ओजः रुद्रौजः (ष० त०) तेन रुद्रौजसा । रुद्रस्य=[illegible] महादेव जे तेनुं ओजस् जे तेज ते रुद्रौजस् कहीए । रुद्रौजसा=शिवप्रभावेण महादेवजीना सामर्थ्य वडे करीने । प्रहृतं=प्रहारः कृतः प्रहार करायेलो (अस्ति छे) ॥५४॥

त्वं इमां अवेहि	स०		शक्यः	अनुनयः
अनुनयः अस्ति	अ०		अनूनां	इमाम्
प्रहृतं अस्ति	अ०			
त्वया प्रहृतम्	भा०			
त्वया अनुनयः शक्यः	क०			

(गु० भा०) આ ગાય કામધેનુ જેવીજ હોવાથી બીજી દૂઝણી ગાયો આપવા છતાં પણ વસિષ્ઠ મુનિનો ક્રોધ કેવી રીતે શાન્ત થઇ શકે તેમ છે? આ ગાય ઉપર તેં જે આક્રમણ કરેલ છે તે તો કેવલ મહાદેવજીના જ પ્રતાપથી. ॥૫૪॥

सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः ।
न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ॥५५॥

(अन्वयः) सा इयं (गौः) मया स्वदेहार्पणनिष्क्रयेण भवत्तः मोचयितुं न्याय्या (अस्ति) एवं तव पारणा विहता न स्यात् च मुनेः क्रियार्थः अलुप्तः भवेत् ॥५५॥

(टीका) सा=पूर्वोक्ता पूर्वे कहेली एवी । इयं=पुरोवर्तिनी आ (गौः गाय जेते) मया=दिलीपेन हुं दिलीप जे तेणे स्वदेहार्पणनिष्क्रयेण निष्क्रीयते अनेन इति निष्क्रयः (कृ० व्यु०) स्वस्य देहः स्वदेहः (ष० त०) स्वदेहस्य अर्पणं स्वदेहार्पणं (ष० त०) स्वदेहार्पणं एव निष्क्रयः स्वदेहार्पणनिष्क्रयः (अ० पू० क० स०) तेन स्वदेहार्पणनिष्क्रयेण । निष्क्रीयते=प्रत्याह्रियते पाछु अपाय अनेन आ वडे करीने ते निष्क्रय कहीए । स्वस्य पोताने जे देह ते स्वदेह कहीए । स्वदेहस्य पोताना देहनुं अर्पण जे आपवुं ते स्वदेहार्पण कहीए । स्वदेहार्पणं एव पोताना देहनुं अर्पण करवुं एज निष्क्रय जे मूल्य ते स्वदेहार्पणनिष्क्रय कहीए । स्वदेहार्पणनिष्क्रयेण=निजकायमूल्येन पोताना देहनुं आपवुं एज मूल्य वडे करीने । भवत्तः भवतः इति भवत्तः (त० व्यु०) भवतः तारा थकी ते भवत्तस् कहीए । भवत्तः= त्वत्तः तारा थकी । मोचयितुं=त्याजयितुं मूकावाने । न्याय्या । न्यायात् अनपेता न्याय्या (त० व्यु०) न्यायात् न्याय थकी अनपेता जे नहि पडेली ते न्याय्या कहीए । न्याय्या=उचिता योग्य एवी (अस्ति छे) एवं=इत्थं कृते सति आवी रीते करवाथी । तव=ते तारी । पारणा उपवासभोजनं व्रतान्तभोजन जेते । विहता विशेषेण हता विहता विशेषेण वधारे हता जे हणायेली ते विहता कहीए । विहता=नष्टा हणायेली एवी । न स्या-

त्=न भवेत् नहि थाय । च=अने । मुनेः मन्ता इति मुनिः (कृ० व्यु०) तस्य मुनेः मन्ता=वेदशास्त्रार्थतत्त्वावगन्ता वेदशास्त्रना अर्थना तत्त्वने जाणे ते मुनि कहीए । मुनेः= वसिष्ठस्य वसिष्ठमुनि जे तेमनो । क्रियार्थः क्रिया एव अर्थः क्रियार्थः (अ० पू० क० स०) क्रिया एव क्रिया एज जे अर्थ ते क्रियार्थ कहीए । क्रियार्थः=होमादिक्रियाप्रयोजनं होमादिक्रियाओनुं प्रयोजन जेते । अलुप्तः न लुप्तः अलुप्तः (न० त०) न=नहि जे लुप्त ते अलुप्त कहीए । अलुप्तः= अप्रतिहतः नहि लोपायेलो एवो । भवेत्=स्यात् होय ।

			विशेषण	विशेष्य
गौः	अस्ति	अ०		
पारणा	न स्यात्	अ०	न्याय्या, सा. इयं,	गौः
क्रियार्थः	भवेत्	अ०	विहता	पारणा
मया इयं	मोचयितुं	भा०	अलुप्तः	क्रियार्थः

(ગુ० ભા०) તે આ ગાય મારે પોતાનો દેહ આપીને તારી પાસેથી છોડાવવી ઉચિત છે. એમ કરવાથી તમારૂં વ્રતાન્ત ભોજન= પારણા થશે, અને વસિષ્ઠમુનિની હોમાદિ ક્રિયા પણ નહિ લોપાય ॥૫૫॥

भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्नहि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥५६॥

(अन्वयः) हि देवदारौ तव महान् यत्नः (अस्ति अतः) परवान् भवान् अपि इदं अवैति (यत्) रक्ष्यं विनाश्य स्वयं अक्षतेन (सता) नियोक्तुः अग्रे स्थातुं शक्यं नहि ॥५६॥

(टीका) हि=यस्मात्कारणात् कारणके । देवदारौ=देवदारुरक्षणे देवदारु वृक्षना रक्षण करवामां । तव=ते तारो । महान्=अधिकः मोटो एवो । यत्नः=प्रयत्नः प्रयत्न जेते (अस्ति छे अतः=अस्मात्कारणात् आ कारणथी) परवान् । परः अस्ति अस्य इति परवान् (त० व्यु०) परः बीजो जे ते अस्ति छे अस्य आने ते परवत् कहीए । परवान्=परा·

धीनः स्वामीपरतंत्र एवो । भवान् अपि=त्वं अपि तुं जेते पण । इदं=वक्ष्यमाणं वचनं वक्ष्यमाण वचन जे तेने । अवैति=जानाति जाणे छे । (यत्=के जे) रक्ष्यं रक्षितुं योग्यं रक्ष्यम् (कृ० व्यु०) तत् रक्ष्यम् । रक्षितुं रक्षण करवाने जे योग्य ते रक्ष्य कहीए । रक्ष्यं=रक्षणीयं वस्तु रक्षण करवा लायक वस्तु जे तेने । विनाश्य=विनाशं प्रापय्य विनाश करावीने । स्वयं=आत्मना पोते । अक्षतेन न क्षतः अक्षतः (न० त०) तेन अक्षतेन । न=नहि जे क्षत ते अक्षत कहीए। अक्षतेन सता=अव्रणेन सता अक्षत एवो सते । नियोक्तुः नियुनक्तीति नियोक्ता (कृ० व्यु०) तस्य नियोक्तुः । नियुनक्ति=नियोजयति योजना करे जे ते नियोक्ता कहीए । नियोक्तुः =नियोजकस्य स्वामिनः योजना करनार स्वामी जे तेना । अग्रे=सम्मुखे सन्मुख (आगळ भागने विषे) स्थातुं=स्थितिं कर्तुं उभा रहेवाने माटे । शक्यं शक्तुं योग्यं शक्यम् (कृ० व्यु०) शक्तुं समर्थ थवाने जे योग्य ते शक्य कहीए । शक्यं नहि=शक्य नथी ॥५६॥

भवान् इदं अवैति स०			
यत्नः	अस्ति अ०	महान्	यत्नः
मया	स्थातुं भा० कृ०	परवान्	भवान्
मया	शक्यम् भा०कृ०	अक्षतेन	} मया
मया	रक्ष्यं विनाश्य भा० कृ०	स्वयम्	} मया

(गु० भा०) કારણકે આ દેવદારૂ વૃક્ષનું રક્ષણ કરવામાં તારો મોટો યત્ન છે. તેથી પરાધીન એવો તું પણ એ તો જાણેજ છે કે માલિકની વસ્તુનો નાશ કરાવીને પોતે અક્ષત દેહથી માલિકના (આગળ) સામે ઉપસ્થિત થવું અત્યન્ત અનુચિત છે.

किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः ।
एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु५७

(अन्वयः) किमपि चेत् अहं तव अहिंस्यः मतः (अस्मि तर्हि त्वं) मे यशःशरीरे दयालुः भव (हि) मद्विधानां एकान्तविध्वंसिषु भौतिकेषु पिण्डेषु अनास्था (भवति) खलु ॥५७॥

(टीका) किमपि=किंवा अथवा । चेत्=यदि जो । अहं=हुं जेते । तव=ते तने । अहिंस्यः हिंसितुं योग्यः हिंस्यः (कृ० व्यु०) न हिंस्यः अहिंस्यः (न० त०) हिंसितुं हिंसा करवाने जे योग्य ते हिंस्य कहीए । न नहि जे हिंस्य ते अहिंस्य कहीए । अहिंस्यः=अवध्यः नहि मारवा योग्य एवो । मतः=ईप्सितः मानेलो एवो (अस्मि छुं । तर्हि तो । त्वं= तुं जेते) मे=मम मारा । यशःशरीरे । यशः एव शरीरं यशःशरीरं (अ० पू० क० स०) तस्मिन् यशःशरीरे । यशः एव यशः एज जे शरीर ते यशःशरीर कहीए । यशः-शरीरे=कीर्तिदेहे यशरूपी शरीरने विषे । दयालुः । दयते असौ दयालुः (कृ० व्यु०)दयते दया करे जे ते दयालु कहीए। दयालुः=कारुणिकः दयालु एवो। भव=एधि था। (हि=[illegible]) मद्विधानां मम विधा इव विधा येषान्ते मद्विधाः (ष० ब०) तेषां मद्विधानां। मम मारा विधा जे प्रकार ते सरखा छे विधा प्रकार ते जेमना ते मद्विध कहीए । मद्विधानां=मादृशानां मारा सरखा प्रकार वाला पुरुषोना । [illegible]कान्तविध्वंसिषु । विध्वंसन्ते इति विध्वंसिनः (कृ० व्यु०) एकान्तं विध्वंसिनः एकान्तविध्वंसिनः (त० स०) तेषु एकान्तविध्वंसिषु । विध्वंसन्ते नाश पामे जे ते विध्वंसिन् कहीए । एकान्तं अवश्य विध्वंसिनः जे ना[illegible]वन्त ते एकान्त-विध्वंसिन् कहीए । एकान्तविध्वंसिषु=अवश्यविनाशि[illegible] अवश्य

नाश पामनार एवा। भौतिकेषु भूतानां विकाराः भौतिकाः (त० व्यु०) तेषु भौतिकेषु। भूतानां=पृथिव्यप्तेजोवाय्वाकाशानाम् पृथिवी जल वायु तेज अने आकाश जे तेमना जे विकार ते भौतिक कहीए। भौतिकेषु=पृथिव्यादिपंचभूतविकारेषु पृथिव्यादि पंचमहाभूतना विकार एवा। पिण्डेषु=शरीरेषु शरीरोने विषे। अनास्था। न आस्था अनास्था (न० त०) न=नहि जे आस्था ते अनास्था कहीए। अनास्था=अनपेक्षा नहि ममत्व जेते (भवति होय छे) खलु निश्चय॥५७॥

त्वं	भव	अहिंस्यः मतः		अहं
अनास्था	भवति			
अहं	अस्मि	दयालुः		त्वम्
(त्रणे अ० क० प्र०)		एकान्तवि० भौतिकेषु		पिण्डेषु

(ગુ૦ ભા૦) અથવા કોઇપણ કારણથી જો હું તને મારવા લાયક ન લાગતો હોઉં તો મારા યશ રૂપી શરીર ઉપર તું દયા કર (અર્થાત્ મારા દેહનું ભક્ષણ કરીને મારા યશનું રક્ષણ કર, એક વખત આ શરીર અવશ્ય નાશ પામનાર જ છે. એટલા માટે) મારા જેવા પુરૂષોને જરૂર નાશ પામનાર પંચ મહાભૂતથી બનેલા શરીર ઉપર આસ્થા=મમતા હોતી નથી. ॥ ૫૭ ॥

सम्बन्धमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनान्ते ।
तद्भूतनाथानुग नार्हसि त्वं सम्बन्धिनो मे प्रणयं विहन्तुम् ॥५८॥

(अन्वयः) (जनाः) संबन्धं आभाषणपूर्वं आहुः। सः वनान्ते संगतयोः नौ वृत्तः (अस्ति) तत् हे भूतनाथानुग, त्वं सम्बन्धिनः मे प्रणयं विहन्तुं न अर्हसि ॥५८॥

(टीका) (जनाः मनुष्यो जेते) सम्बन्धं=सख्यं सख्य जे तेने। आभाषणपूर्वं आभाषणं पूर्वं यस्य सः आभाषणपूर्वः (ष० ब०) तं आभाषणपूर्वम्। आभाषणं=आलापः भाषण

छे पूर्व प्रथम कारण ते जेनुं ते आभाषणपूर्व कहीए । आभाषणपूर्वं=आलापपूर्वकारणं वातचीत छे पूर्वकारण तेजेनुं एवाने । आहुः=कथयन्ति कहे छे । सः=तादृक् सम्बन्धः तेवो सम्बन्ध जेते । वनान्ते वनस्य अन्तः वनान्तः (ष० त०) तस्मिन् वनान्ते । वनस्य वन जे तेनो अन्त जे मध्यभाग ते वनान्त कहीए । वनान्ते=अरण्यमध्ये वनना मध्यमां । संगतयोः= मिलितयोः मळेला एवा । नौ=आवयोः आपण बन्नेनो । वृत्तः=जातः उत्पन्न थयेलो (अस्ति छे) तत् तस्मात्कारणात् (संबन्धित्वात्) ते कारणथी (सम्बन्धि होवाथी) हे भूतनाथानुग । अनु गच्छतीति अनुगः (कृ० व्यु०) भूतानां नाथः भूतनाथः (ष० त०) भूतनाथस्य अनुगः भूतनाथानुगः (ष० त०) तत्संम्बुद्धौ हे भूतनाथानुग । अनु=पश्चात् पाछळथी गच्छति गति करे जे ते अनुग कहीए । भूतानां= प्राणिनां प्राणिओ जे तेमनो नाथ जे स्वामी ते भूतनाथ कहीए । भूतनाथस्य=शङ्करस्य शङ्कर जेतेनो अनुग जे अनुचर ते भूतनाथानुग कहीए । तत्सम्बुद्धौ तेना संबोधनमां हे भूतनाथानुग=हे शिवानुचर सिंह हे सिंह । त्वं=भवान् तुं जेते । सम्बन्धिनः । संबन्धः अस्ति अस्य इति सम्बन्धी (त० व्यु०) तस्य सम्बन्धिनः सम्बन्धः सम्बन्ध जेते अस्ति छे अस्य आने ते संबन्धिन् कहीए । सम्बन्धिनः=प्रणयिनः सम्बंधी एवा । मे=मम मारी । प्रणयं=याच्ञाम् याचना जे तेने विहन्तुं=नाशयितुं नाश करवाने । न अर्हसि=न योग्यः असि योग्य नथी ॥५८॥

